24

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
ग्रंथालय

ग्रंथ नाव उच्छिष्ट गणपति कवचम्
लेखक [लिखित पत्रे ३]

मर४ : ४९८
९०

160

॥श्रीगणेशायनमः॥ पाशांकुशाधनुर्बाणौ लोल हस्तंगजाननं॥ सांद्रसिंदूररक्तां
१ गंनग्ननारीसुखातुरं॥१॥ नारीयोनिरसास्वादलोलुपंकाममोहितं॥ स्ववा
मांकुस्थदाराणां कंठालिंगनतत्परं॥२॥ स्वपादपद्मभक्तानामभिष्टफलदा
यकं॥ एवंगणपतिंध्यायेत्सर्वकामार्थसिद्धये॥३॥ इतिध्यात्वाजपेद्यथा॥ कृ
ष्णाष्टम्यांसमारभ्ययावत्कृष्णचतुर्दशी॥ कामिन्याःसंगमंकृत्वातदुच्छिष्टस
मन्वितः॥४॥ जपेन्मंत्रस्यसिध्यर्थमष्टोत्तरसहस्रकं॥५ सिद्धिर्भवतिमंत्र
स्यसर्वकर्मजयोभवेत्॥५॥ तर्पणंचाभिषेकंच होमंकुर्याद्दशांशतः॥ मि ३
ष्टान्नभोजनंदद्यात्ब्राह्मणेभ्यःस्वशक्तितः॥ होमद्रव्याणिनारीकेर
कदलीफललाजान्मोदकान्पृथुकसक्तुतिलेक्षुकान्॥ संनिवेद्यपरित

पंचमंत्री मंत्रमेतदुभयं प्रजपेत्सदा ॥७॥ ॐ संपयेगं क्लीं ह्रीं क्रौं आं महास्तनउ
च्छिष्टाय लंबोदराय हस्तिमुखाय सर्वकामफलप्रदाय स्वाहा ॥ श्रीदेव्युवाच
देवदेव जगन्नाथ भक्तानुग्रहकारक ॥ विना ध्यानं विना होमं विना मंधि । ना
मंत्रं विना जपं ॥१॥ यस्य स्मरणमात्रेण लभते सिद्धिचिंतितं ॥ तदहं श्रोतु
मिच्छामि कथयस्व जगत्प्रभो ॥२॥ ईश्वर उवाच ॥ उच्छिष्टगणनाथस्य कव
चं सर्वसिद्धिदं ॥ अन्यायासं विना कष्टं जपमात्रेण सिद्धिदं ॥३॥ एकांते निर्झ
रेऽरण्ये गव्हरे चत्वरे प्रांगणे ॥ सिंधुतीरे गुरोर्गेहे कुलवृक्षस्य केजले ॥४॥
त्रावं देवाकये तीर्थे लब्ध्वेदं जपमाचरेत् ॥ स्नानं शौचाभिषेकं च नास्ति बंधक
प्रिये ॥५॥ दरिद्रांतकरं शीघ्रं सर्वज्ञत्वजयप्रदं ॥ सहस्रश्रपथं कुर्वे यदिस्ते

होक्तियांप्रति॥६॥ निंदकायकुशिष्याय खलायकुत्सितायच॥ दुष्टायपरशिष्याय
घातकायशठायच॥७॥ वंचकायहतघ्नायनदातव्यंपुनः पुनः गुरुभक्तायदा
तव्यंस्वशिष्यायविशेषतः॥८॥ गुरुसंकेतमात्रेण कल्पोप्रत्यक्षसिद्धिदं॥ देवोच्छिष्टं
प्रयत्नेन तथोच्छिष्टंमहात्मनः॥ अप्रकाश्यंतुफलदंनान्यथावचनंमम॥ एषारा
जन्वतीविद्यापित्रापुत्रंनकथ्यते॥१०॥ अथवक्ष्यामिदेवेशि कवचंमंत्रपूर्वकं॥
ऋषिर्मेगणकः पातुशिरसेचनिरंतरं॥११॥ त्राहिमांदेविगायत्रीछंदोरूपा
सदामुखे॥ हृदयंपातुमेनित्यमुच्छिष्टमनुदेवते॥१२॥ गुह्यंरक्षतुगंबीजंस्वा
हाशक्तिश्चपादयोः॥ क्लींकीलकंचसर्वांगे विनियोगंपातुसर्वदा॥१३॥ पार्श्वद्व
योः स्वाहाशक्तिः पातुमांगणनायकः॥ ह्रींरवायांमदनः पातुन्मध्येगणप
त्तया॥१४॥ हस्तिमुखायशिरसे लंबोदरायभालके॥ उच्छिष्टः पातुमेनेत्रे

कृपैपातु महात्मने॥१५॥ पाशांकुशौ महाबीजं नासिकायां च रक्षतु॥ मायांधनु
र्धरः पातु आत्म जिव्हासदन्नभुक्॥१६॥ गंबीजं पातु मां नित्यं ग्रीवायां कंठदेवता
के॥ घेघेबीजं सदा रक्षेद्वैतो वा सर्वष्टचके॥१७॥ सर्वकाम फलावाप्तिः पातु मां
चकरहृदये॥ उच्छिष्टायहृदयं तु वान्हिबीजं तथोत्तरे॥१८॥ जायाबीजं तथा कु
क्षौ हारस्रुप्रवं न्यसेत॥ जंघायां गणनाथश्च पार्श्वौ पातु विनायकः॥१९॥
शिरसः पादपर्यंतं मुच्छिष्टगणपोवतु॥ द्विशोष्टे च तथा काचो पातालेविदि
ग्वाष्टक २०॥ अहर्निशं सदा पातु मद विव्हललोचनः॥ जलेनिलेच संग्रामे दुष्ट
कारागृहे वने॥२१॥ राजद्वारे तथा घोरे रक्षेद्व गणनायकः॥ इदं तु कवचं
दिव्यं ममवक्त्राद्विनिर्गतं॥२२॥ अतः परं प्रवक्ष्यामि तव भक्त्या वरानने॥ मं

३ त्रानानाविधाः संतिध्यानंचबहुधाप्रिये॥२३॥तत्सर्वंसिद्धिदंदेविकवचात्तिमा
त्रत०॥किंतेनबहुनोक्तेननान्यथावचनंमम॥ २४॥ इतिश्रीरुद्रयामलेशिव
पार्वतीसंवादेउ० गणपतिकवचंसंपूर्णं॥ ॥शुभमस्तु॥ श्रीः॥ शुभं॥
अस्यश्रीउछिष्टविनायकमहामंत्रराजस्य। गणकऋषिः। गायत्रीछंदः। उछि
ष्टविनायकोदेवता॥ गंबीजं। स्वाहाशक्तिः॥ क्लींकिलकं। श्रीउ०प्रसादसिध्य
र्थंजपेविनियोगः॥ ॐगणकऋषयेनमः। गायत्रीछंदसेनमोमुखे। उ०क
देवतायैनमोहृदये० गंबीजायनमः गुह्ये स्वाहाशक्तयेनमः पादयोः क्लीं राम ३
किलकायनमः सर्वांगि॥ ॥ ॥ ॥ ॥

६८०